Roll No. | | | | | | |

Candidates must write the Set No. on the title page of the answer book.

# SAHODAYA PRE BOARD EXAMINATION - 2023-24

- Please check that this question paper contains **11** printed pages.
- Set number given on the right-hand side of the question paper should be written on the title page of the answer book by the candidates.
- Check that this question paper contains **18** questions.
- Write down the Serial Number of the question in the left side of the margin before attempting it.
- 15 minutes time has been allotted to read this question paper. The question paper will be distributed 15 minutes prior to the commencement of the examination. The students will read the question paper only and will not write any answer on the answer script during this period. Students should not write anything in the question paper.

## कक्षा - दशमी

## संस्कृतम् (सम्प्रेषणात्मकम्)

## (कोड़ सङ्ख्या - 119)

**Time Allowed: 3 Hours** **Maximum Marks : 80**

**सामान्यनिर्देशाः**

- उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः ।
- अस्मिन् प्रश्नपत्रे चत्वारः भागाः सन्ति ।

| | | | | |
|---|---|---|---|---|
| 'क' – भागः | - | अपठितावबोधनम् | - | 10 अङ्काः |
| 'ख' – भागः | - | रचनात्मककार्यम् | - | 15 अङ्काः |
| 'ग' – भागः | - | अनुप्रयुक्तव्याकरणम् | - | 25 अङ्काः |
| 'घ' – भागः | - | पठितावबोधनम् | - | 30 अङ्काः |

- प्रत्येकं भागम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
- उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः ।
- प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः ।
- सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।
- प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः ।

## 'क' – भागः - अपठितावबोधनम् - 10 अङ्काः

**1. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 10**

जीवने सफलतायाः आधारः पुरुषार्थः एव । अस्य अभावेन नरः सुख-समृद्धिम् आप्तुम् असमर्थः भवति यशः च न प्राप्नोति । यथा-यथा नरः पुरुषार्थम् अचिनोत् तथा-तथा तेन सफलता प्राप्ता । पुरुषार्थिनः एव संसारे विलक्षण- प्रतिभाम् अर्जितवन्तः । अनेन एव नरः एवरेष्टशिखरम् अजयत् अन्तरीक्षं च अगच्छत् । देशसेवया समाजसेवया च पुरुषार्थिभिः उल्लेखनीयानि कार्याणि कृतानि । अस्माकम् इतिहासे तेषां गौरवगानं विद्यते । आपत्काले येषां मनांसि विचलितानि न भवन्ति, ते एव जीवने सफलतां प्राप्नुवन्ति । पुरुषार्थिनां कृते तु पुरुषार्थम् एव उपासना अस्ति । यः जनः स्वजीवने सफलतां प्राप्तुम् इच्छति सः पुरुषार्थम् अवश्यमेव कुर्यात् । पुरुषार्थस्य अभावे जनः सफलतां प्राप्तुं न शक्नोति ।

**अ. एकपदेन उत्तरत - ( केवलं प्रश्नद्वयम् )** **[1x2=2]**

(i) कस्य अभावेन नरः सुख- समृद्धिम् आप्तुम् असमर्थः अस्ति ?

(ii) पुरुषार्थेन जनः कुत्र अगच्छत् ?

(iii) संसारे के विलक्षणप्रतिभाम् अर्जितवन्तः ?

**आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् )** **[2x2=4]**

(i) पुरुषार्थिभिः कथम् उल्लेखनीयानि कार्याणि कृतानि ?

(ii) पुरुषार्थिनां कृते कुत्र गौरवगानं विद्यते ?

(iii) जीवने के सफलतां प्राप्नुवन्ति ?

**इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत -** **[1]**

**ई. यथानिर्देशम् उत्तरत - (केवलं प्रश्नत्रयम्)** **[1X3=3]**

(i) **भवति** इति क्रियापदस्य अनुच्छेदे किं कर्तृपदं प्रयुक्तम् ?

(क) नरः (ख) असमर्थः (ग) यशः (घ) जनः

(ii) **विफलता** इति पदस्य अनुच्छेदे किं विलोमपदं प्रयुक्तम् ?

(क) यथा (ख) तथा (ग) सफलता (घ) असमर्थः

(iii) **मानवः** इति पदस्य किं पर्यायपदम् अनुच्छेदे प्रयुक्तम् ?

(क) नरः (ख) पुरुषार्थी (ग) देशसेवा (घ) पुरुषार्थः

(iv) **कार्याणि** इति विशेष्यपदस्य किं विशेषणपदम् अत्र प्रयुक्तम् ?

(क) उल्लेखनीयानि (ख) उपासना (ग) कृतानि (घ) आधारः

## 'ख' – भागः- रचनात्मककार्यम् - 15 अङ्काः

**2. भवतः नाम विद्याधरः अस्ति । भवान् जलसंरक्षणस्य महत्त्वं वर्णयन् मित्रम् अमरं प्रति पत्रं लिखति, तदर्थं मञ्जूषायां प्रदत्तैः उचितैः पदैः पत्रं पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत -** **[½x10=5]**

(i)……….

तिथिः …….

प्रियमित्र !

सप्रेम नमोनमः ।

अत्र कुशलं तत्रास्तु । भवतः पत्रं पठित्वा अहम् अतीव प्रसन्नताम् अनुभवामि यतोहि भवान् स्वमित्रैः (ii) ……… जलसंरक्षणप्रचारकार्ये रतोऽस्ति । एषः तु उत्तमः (iii) …… अस्ति । वयं सर्वे एव (iv) …….. यत् जीवने जलस्य महत्त्वं तु अतुलनीयम् । जलम् एव (v)……… इति प्रसिद्धं वाक्यम्, परं तथापि वयम् अस्य (vi) …… कुर्मः । अनेन आगामिकाले कियान् भीषणजलसङ्कटः भवेत् इति कोऽपि न (vii)……. । जलसंरक्षणार्थं जागरुकता अनिवार्या एव । यदि जनाः अस्मिन् विषये ध्यानं न दास्यन्ति तर्हि अस्माकं (viii) ………. स्थितिरपि अफ्रिकादेशवत् भविष्यति । अतः जलसंरक्षणार्थं चिन्तनम् आवश्यकम् अस्ति । शेषं सर्वं कुशलम् । भवतः (ix) ……..मम चरणवन्दना कथनीया । अनुजाय च स्नेहराशिः ।


भवदीयः मित्रम्

(x) ………

**मञ्जूषा**

| |
|---|
| अपव्ययं, परीक्षाभवनतः, सह, प्रयासः, जीवनम्, विचारयति, पितृचरणयोः, विद्याधरः, जानीमः, देशस्य |

**3. प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायाः सहायतया पञ्चवाक्यानि संस्कृतेन लिखत -** **[1x5=5]**



**मञ्जूषा**

| |
|---|
| प्रेरणास्थलस्य, चित्रम्, त्रयः, अधिकारिणः, पुष्पाञ्जलिं, यच्छन्ति, देशस्य कृते, आयोज्यते, बलिदानस्य सन्देशं , बलिदानदिवसः, देशः, देशप्रेमभावना |

**अथवा**

**निम्नलिखितं विषयम् अधिकृत्य मञ्जूषाप्रदत्तशब्दानां साहाय्येन पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत -**

**'श्रीमद् भगवद्गीता'**

**मञ्जूषा**

| |
|---|
| महाभारतस्य, अष्टादश, श्लोकाः, अंशः, सप्तशतं, अध्यायाः, युद्धे, उपादिशत्, अजरः अमरः च, कर्त्तव्यम्, आत्मा, धार्मिकं |

**4. अधोलिखितां कथां मञ्जूषायाः पदानां सहायतया पूरयित्वा पुनः लिखत -** **[½x10=5]**

रामायणे इदं वर्णितं यत् एकदा स्व (i)......... जनकपुत्री सीता श्रृङ्गारम् अकरोत् । सा षोडशश्रृङ्गारं कृत्वा स्वशिरसि सौभाग्यचिह्नं सिन्दूरम् अरचयत् । एतद् दृष्ट्वा श्री हनुमान् (ii)....... अपृच्छत् – 'मातः! भवती कथं (iii).......... स्वमस्तके सिन्दूरं रचयति ?' माता सीता अवदत्- 'प्रियवर ! अनेन (iv).......... स्वामिनः आयुः (v) .......... सः प्रसीदति अपि । अतः अहम् एवं करोमि ।' एतच्छ्रुत्वा हनुमान् ततः (vi)........ । एकस्मिन् दिवसे श्री हनुमान् सम्पूर्णे शरीरे (vii) ............ लेपनं कृत्वा राजसभाम् आगच्छत् । तदा तस्य रक्तवर्णं (viii)........... दृष्ट्वा सर्वे जनाः अहसन् । कारणं पृष्टे सति हनुमान् अवदत् - 'माता अवदत् यत् सिन्दूरेण स्वामिनः प्रसन्नता आयुश्च वर्धेते, अतः अहमपि तेन कारणेन एव (ix)......... शरीरे सिन्दूरलेपनम् अकरवम् ।' एतच्छ्रुत्वा (x) ...........प्रसन्नः भूत्वा तस्य आलिङ्गनम् अकरोत् ।

**मञ्जूषा**

| |
|---|
| शरीरं , श्रीरामः, वर्धते, श्रृङ्गारकक्षे, प्राचलत्, स्वसम्पूर्णे, प्रतिदिनम्, सिन्दूरम्, सीताम्, सिन्दूरेण |

**अथवा**

**रिक्तस्थानानि पूरयित्वा अधोलिखितसम्वादं मञ्जूषायाः सहायतयाः पुनः लिखत -** **[1x5=5]**

विवेकः - पितामह ! प्रणमामि ।

पितामहः - प्रसन्नः भव ।

विवेकः - धन्यवादः ।

पितामहः- किं दीनेशः अपि (i)............?

विवेकः- नहि, स तु पठितुं विद्यालये एव स्थितः ।

पितामहः- तव (ii).....................?

विवेकः- अहं सर्वाधिकान् अङ्कान् प्राप्य उत्तीर्णः जातः ।

पितामहः- साधु , साधु । (iii)..................?

विवेकः- अहं विद्यालयं गत्वा सर्वप्रथमं गुरून् नमामि । प्रार्थनास्थले (iv). .............।
कठिनं विषयं च सविनयं शिक्षकं पृच्छामि ।

पितामहः - छात्रान् प्रति तव कीदृशः व्यवहारः अस्ति ?

विवेकः- मित्रेषु मम अतीव स्नेहः अस्ति ।

पितामहः - शोभनम् ! त्वं श्रेष्ठः न केवलम् (v)..................।

**मञ्जूषा**

- प्रथमसत्रस्य परीक्षायाः कः परिणामः
- अध्ययने व्यवहारे च अपि
- महापुरुषाणां विषये अपि किञ्चित् वदामि
- आगतः विद्यालयात्
- विद्यालये तव कीदृशी दिनचर्या प्रचलति

## 'ग' – भागः- अनुप्रयुक्तव्याकरणम् - 25 अङ्काः

**5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिविच्छेदं वा कुरुत-** **[1x4=4]**
**(केवलं प्रश्नचतुष्टयम्)**

(i) सरस्वत्याः कोशः **सञ्चयात्** क्षयमायाति ।

(ii) **यत् + इच्छसि** तदुच्यताम् ।

(iii) रमणीया हि **सृष्टिः+एषा** ।

(iv) मन्त्री **सभायामप्यकातरः** भवेत् ।

(v) **कार्यक्रमस्तु** सुनिश्चितः ।

**6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चिनुत-** **[1x4=4]**
**(केवलं प्रश्नचतुष्टयम् )**

(i) इयं **सूर्योदयभूमिः** ।

(क) सूर्योदयात् भूमिः (ख) सूर्योदयस्य भूमिः

(ग) सूर्योदयाय भूमिः (घ) सूर्योदये भूमिः

(ii) विमूढधीः **न पक्वं** फलं खादति ।

(क) नपक्वं (ख) नोपक्वं

(ग) अपक्वं (घ) पक्वं न

(iii) अये कथं **श्रीकृष्ण: च अर्जुन: च: युधिष्ठिर: च:** ।

(क) श्रीकृष्णार्जुनयुधिष्ठिर: (ख) श्रीकृष्णार्जुनयुधिष्ठिरौ

(ग) श्रीकृष्णार्जुनयुधिष्ठिरा: (घ) श्रीकृष्णोर्जुनयुधिष्ठिरा:

(iv) साश्रुनयनो यूथपति: **सगद्गदम्** उक्तवान् ।

(क) सह गद्गदम् (ख) सह गद्गदेन

(ग) सहित गद्गदेन (घ) गद्गदेन सह

(v) **बकहंसयो**: को भेद: ?

(क) बकस्य च हंस: च (ख) बके च हंसे च

(ग) बक: च हंस: च (घ) बकं च हंसं च

**7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति –प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्य: चित्वा लिखत- (केवलं प्रश्नचतुष्टयम्)** **[1x4=4]**

(i) ईटा हि तस्य प्रधाना **पुरी** अस्ति ।

(क) पुर+ ई (ख) पुर+ इ

(ग) पुर+ ङीप् (घ) पुर+ ङी

(ii) चित्ते वाचि च **अवक्रता** भवेत् ।

(क) अवक्र + टाप् (ख) अवक्र + तल्

(ग) अवक्र: + ता (घ) अवक्र + आ

(iii) **विचित्रा** खलु दैवगति: ।

(क) विचित्र + आ (ख) विचित्र + तल्

(ग) विचित्र + टाप् (घ) विचित्र: + टाप्

(iv) सर्वेषाम् एव अत्र **महत् + त्व** विद्यते ।

(क) महत्त्व: (ख) महत्त्वं (ग) महत्ता (घ) महत्त्वा

(v) **भग + मतुप्** बोधिसत्त्व: शिवीनांा राजा अभवत् ।

(क) भगवत: (ख) भगमत: (ग) भगवान् (घ) भगमान्

**8. वाच्यानुसारं मञ्जूषाप्रदत्तै: उचितपदै: रिक्तस्थानानि पूरयित्वा अधोलिखितं सम्वादं पुन: लिखत - (केवलं प्रश्नत्रयम्)** **[1x3=3]**

आदित्य: - अभिनव ! किं (i) ..................... क्रीड़ितुं गच्छसि ?

अभिनव: - न, मया तु स्वपाठ: (ii)...................... ।

आदित्य: - शोभनम् ! त्वम् (iii)...................... अपि लिखसि किम् ?

अभिनव: - न (iv) ...................... तु गणितस्य अभ्यास: क्रियते ।

**मञ्जूषा**

| |
|---|
| पठ्यते, त्वं, मया, निबन्धम् |

**9.** **कालबोधकशब्दैः अधोलिखित-दिनचर्यां पूरयत - (केवलं प्रश्नत्रयम्)** **[1x3=3]**

(i) मम भ्राता प्रातः..................... (5:30) भ्रमणार्थं गच्छति ।

(ii) अहं प्रातः.................. (8.15) वादने कार्यालयं गच्छामि ।

(iii) तव भ्राता मध्याह्ने........... (3:00) विद्यालयात् आगच्छति ।

(iv) मम जनकः सायं............. (6:45) गृहं प्रत्यागच्छति ।

**10.** **मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत - (केवलं प्रश्नचतुष्टयम्)** **[1x4=4]**

(i) न......... कलहेन समयं वृथा यापयेत ।

(ii) कलशात् .............सर्पः निर्गच्छति ।

(iii) 'मोपीन' इति ........... कृषिपर्व अस्ति ।

(iv) अवक्रता........... चित्ते तथा वाचि भवेत् ।

(v) गुरूपदेशेन.......... अनेन बालवचसा मम चक्षुषी समुन्मीलिते ।

**मञ्जूषा**

| अपि, तावत्, बहिः, यथा, इव |
|---|

**11.** **अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं विकल्पेभ्यः चित्वा वाक्यानि पुनः लिखत- (केवलं प्रश्नत्रयम्)** **[1x3=3]**

(i) महाकविः तिरुक्कुरल् पावनं **ग्रन्थः** विरचितवान् ।

(क) ग्रन्थाः (ख) ग्रन्थान् (ग) ग्रन्थं (घ) ग्रन्थस्य

(ii) **युवां** वराकान् मीनान् छलेन अधिगृह्य क्रूरतया भक्षयसि ।

(क) त्वं (ख) यूयं (ग) अहं (घ) वयं

(iii) अहं **जानीवः** इदं स्थानम् ।

(क) जानामि (ख) जानीमः (ग) जानन्ति (घ) जानति

(iv) **मनस्य** निग्रहः वायोः इव कठिनम् ।

(क) मनः (ख) मनांसि (ग) मनसः (घ) मनसि

**'घ' – भागः- पठितावबोधनम् - 30 अङ्काः**

**12.** **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -** **5**

अस्ति कर्मपुरनाम्नि नगरे प्रच्छन्नभाग्य-नामधेयः कश्चित् कुमारः । बाल्ये वयसि विद्यापराङ्मुखः स केनचित् दुष्टबुद्धिनाम्ना चौरेण सह चौर्यकर्मणि निरतः सञ्जातः । एकदा स दुष्टबुद्धिना सार्धं कस्यचित् श्रेष्ठिनः गेहे धनहरणार्थं ग्रामान्तरं प्रस्थितः । अथ व्रजन्तौ तौ गर्तसङ्कुले मार्गे क्रीडतः कांश्चित् बालकान् प्रेक्ष्य अवदताम्-भो भो बालकाः! कथमत्र नतोन्नते विषमे मार्गे क्रीडथ? यदि कश्चित् गर्ते पतेत् तर्हि स विकलाङ्गो भूत्वा चिरं क्लेशम् अनुभवेत् ।

अ. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) [½X2=1]

(i) बाल्ये वयसि प्रच्छन्नभाग्य: कीदृश: आसीत्?

(ii) बालका: कुत्र क्रीडन्ति स्म ?

(iii) प्रच्छन्नभाग्य: कुत्र वसति स्म ?

आ. पूर्णवाक्येन उत्तरत-(केवलं प्रश्नद्वयम्) [1X 2=2]

(i) दुष्टबुद्धिना सह प्रच्छन्नभाग्य: कुत्र गत: ?

(ii) दुष्टबुद्धिना सह प्रच्छन्नभाग्य: किमर्थं गत: ?

(iii) यदि कश्चित् गर्ते पतेत् तर्हि स: किम् अनुभवेत्?

इ. यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्) [1X 2=2]

(i) <u>अवदताम्</u> इति क्रियापदस्य किं कर्तृपदं गद्यांशे प्रयुक्तम् ?

(ii) <u>'कस्यचित्'</u> इति कस्य विशेष्यपदस्य विशेषणम् अस्ति ?

(iii) <u>'विषमे'</u> इति पदस्य किं पर्यायपदम् अत्र प्रदत्तम् ?

13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 5

विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्त: प्रकीर्तिता: ।
अन्येषां वदने ये तु ते चक्षुर्नामनी मते ।।
तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ !
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम् ।।

अ. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) [½X2=1]

(i) के चक्षुष्मन्त: प्रकीर्तिता: ?

(ii) चक्षुषी कुत्र भवत: ?

(iii) श्लोके सम्बोधनपदं किम् ?

आ. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) [1X 2=2]

(i) विद्वांस: कुत्र चक्षुष्मन्त: इति प्रकीर्तिता: ?

(ii) विद्वांस: कीदृशा: भवन्ति ?

(iii) आदौ कानि वशीकरणीयानि ?

इ. यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्) [1X 2=2]

(i) <u>त्वम्</u> इत्यस्य कर्तृपदस्य क्रियापदं किम्?

(ii) <u>मारय</u> इत्यस्य क: पर्याय: श्लोके आगत: ?

(iii) <u>चक्षुष्मन्त:</u> इति विशेषणपदस्य किं विशेष्यपदम् अत्र प्रयुक्तम्?

14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 5

राजीव: - किम् एतत् कस्यचित् दुर्गस्य चित्रम् ?

पर्यटनाधिकारी - आम् ! एतत् दिवाङ्ग- उपत्यका - मण्डले स्थितं भीष्मकनगरदुर्गम् । अस्य अवशेषा: तु आर्यकला-संस्कृति-सम्पद: परिचायका: । अधुना इदं चित्रं पश्यत ।

शैलेश: - अहं जानामि इदं स्थानम् । इदं तु 'तवाङ्ग-गोम्पा' इति प्रसिद्ध: बौद्धमठ: ।

पर्यटनाधिकारी - सम्यक् अभिज्ञातम् ! मनोहरे सुरम्ये 'तवाङ्ग' इति स्थले राजते अयं बौद्धमठ:। पञ्चशतानां बौद्धभिक्षूणां निवासयोग्या स्थली इयम् । लोहितजनपदे अपि अनेकबौद्धविहारा: सन्ति ।

नीलिमा - मान्यवर ! मया अस्य प्रदेशस्य 'परशुरामकुण्डम्' इति दर्शनीयस्थलविषये अपि पठितम् । किम् इदम् ?

**अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** **[½X2=1]**

(i) कस्मिन् जनपदे अनेके बौद्धविहारा: सन्ति ?

(ii) भीष्मकनगरदुर्गं कस्मिन् मण्डले स्थितम् ?

(iii) प्रसिद्धबौद्धमठस्य नाम किम् ?

**आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** **[1X 2=2]**

(i) नीलिमा पर्यटनाधिकारिणं कं प्रश्नं पृच्छति ?

(ii) भीष्मकनगरदुर्गस्य अवशेषा: केषां परिचायका: सन्ति ?

(iii) प्रसिद्ध: बौद्धमठ: कुत्र वर्तते ?

**इ. यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्)** **[1X 2=2]**

(i) नाट्यांशे **सन्ति** इति क्रियाया: कर्तृपदं किम् ?

(ii) **राजते अयं बौद्धमठ:** - अस्मिन् वाक्ये क्रियापदं किम् ?

(iii) **चित्रम्** इति विशेष्यपदस्य विशेषणपदं किम् ?

**15. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत - (केवलं प्रश्नपञ्चकम् )** **[1x5=5]**

(i) **अनुद्वेगकरं** वाक्यं वाङ्मयं तप: उच्यते ।

(ii) मयूरस्य नृत्यं **प्रकृते**: आराधना ।

(iii) अश्वा: **प्राणत्राणाय** इतस्तत: अधावन् ।

(iv) **वारणावते** भीम: पाण्डवान् रक्षितवान् ।

(v) **मन**: अभ्यासेन वैराग्येण च गृह्यते ।

(vi) **जनकेन** सुताय शैशवे विद्याधनं दीयते ।

**16. मञ्जूषात: समुचितपदानि चित्वा अधोलिखित- श्लोकस्य अन्वयं पूरयित्वा पुन: लिखत-** **[½x4=2]**

अपूर्व: कोऽपि कोशोऽयं विद्यते तव भारति !
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात् ।।

**अन्वय:** - भारति! तव अयं (i). ..................कोऽपि (ii).........विद्यते ।

य: व्ययत: (iii)........आयाति (iv)................ क्षयम् आयाति ।

**मञ्जूषा**

| |
|---|
| अपूर्व:, सञ्चयात्, वृद्धिम्, कोश: |

**अथवा**

**मञ्जूषाया: साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुन: लिखत -** **[½x4=2]**

प्रार्थितं ते मया चक्रं देवदानवपूजितम् ।

अजेय: स्यामिति विभो ! सत्यमेतद् ब्रवीमि ते ।।

**भावार्थ:** - हे विभो ! अहं भवद्भ्य: (i).......... पूजितम् इदं सुदर्शन-नामकं चक्रमेव (ii). ......... इच्छामि, यत: अनेन अहं सम्पूर्णरूपेण (iii)..........भवितुं शक्नोमि । भवन्तम् इदं (iv)......... वदामि ।

**मञ्जूषा**

| |
|---|
| प्राप्तुम्, सत्यं, देवदानवै:, अपराजेय: |

**17. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत -** **[1x4=4]**
**(केवलं प्रश्नचतुष्टयम्)**

(i) आचार्यात् <u>**पादम्**</u> आदत्ते ।

(क) चरणम् (ख) चतुर्थांशम्

(ग) श्लोकस्य पंक्तिम् (घ) शारदा

(ii) अन्यस्मिन् <u>**अहनि**</u> महानसं प्रविष्ट: मेष: सूपकारेण ताडित: ।

(क) रात्रौ (ख) मार्गे

(ग) दिवसे (घ) प्रात: काले

(iii) <u>**अनृतं**</u> वदसि चेत् काक: दशेत् ।

(क) सत्यं (ख) असत्यं

(ग) पाकशालां (घ) वनं

(iv) स: विवेक: इति <u>**ईरित:**</u> ।

(क) दृष्ट: (ख) श्रुत:

(ग) कथित: (घ) नीत:

(v) <u>**विद्धि**</u> एनं हि वैरिणम् ।

(क) जानीहि (ख) अर्पय

(ग) पश्य (घ) कुरु

**18. अधोलिखित-कथां मञ्जूषापदानां सहायतया रिक्तस्थानानि पूरयित्वा पुनः लिखत - [½x8=4]**

अथ कदाचित् दानशालासु विचरन् स राजा (i) .............. सन्तुष्टानाम् (ii)............ विरलसङ्ख्यां विलोक्य अचिन्तयत् 'मम अर्थिनः तु धनलाभमात्रेण सन्तोषं भजन्ते। नूनं ते (iii) ......... सौभाग्यशालिनः यान् याचकाः (iv)...........अङ्गानि अपि याचन्ते।' एवं (v)........: स्वेषु गात्रेष्वपि निरासक्तिं विज्ञाय सकलं ब्रह्माण्डं व्याकुलं (vi) ......... । राज्ञि एवं विचारयति सति तस्य (vii).............परीक्षितुं देवाधिपतिः शक्रः नेत्रहीनयाचकस्य (viii)......... धारयित्वा तत्पुरतः आगच्छत् ।

**मञ्जूषा**

| |
|---|
| राज्ञः, शरीरस्य, बहुधनलाभेन, रूपं, अर्थिनां, सञ्जातम्, दानशीलतां, दानवीराः |

**********